# नित्य पारायण श्लोकाः

## प्रभात श्लोकः

करागे्र वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले स्थिता गौरी प्रभाते करदर्शनम् ॥
[पाठभेदः - करमूले तु गोविन्दः प्रभाते करदर्शनम् ॥]

## प्रभात भूमि श्लोकः

समुद्र वसने देवी पर्वत स्तन मण्डले ।
विष्णुपत्नि नमस्तुभ्यम्, पादस्पर्श-ङ्क्षमस्वमे ॥

## सूर्योदय श्लोकः

ब्रह्मस्वरूप मुदये मध्याह्नेतु महेश्वरम् ।
साह-न्ध्यायेत्सदा विष्णु-न्त्रिमूर्ति-ञ्च दिवाकरम् ॥

## स्नान श्लोकः

गङ्गे च यमुने चैव गोदावरी सरस्वती
नर्मदे सिन्धु कावेरी जलेस्मिन् सन्निधि-ङ्कुरु ॥

## नमस्कार श्लोकः

त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविण-न्त्वमेव, त्वमेव सर्व-म्मम देवदेव ॥

## भस्म धारण श्लोकः

श्रीकर-ञ्च पवित्र-ञ्च शोक निवारणम् ।
लोके वशीकर-म्पुंसा-म्भस्म-न्त्रैलोक्य पावनम् ॥

## भोजन पूर्व श्लोकाः

ब्रह्मार्पण-म्ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणाहुतम् ।
ब्रह्मैव तेन गन्तव्य-म्ब्रह्म कर्म समाधिनः ॥

अहं-वैँश्वानरो भूत्वा प्राणिना-न्देहमाश्रितः ।
प्राणापान समायुक्तः पचाम्यन्न-ञ्चतुर्विधम् ॥

अन्नपूर्णे सदा पूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्य सिद्ध्यर्थ-म्भिक्षा-न्देहि च पार्वति ॥

त्वदीयं-वँस्तु गोविन्द तुभ्यमेव समर्पये ।
गृहाण सुमुखो भूत्वा प्रसीद परमेश्वर ॥

## भोजनानन्तर श्लोकः

अगस्त्यं-वैँनतेय-ञ्च शमी-ञ्च बडबालनम् ।
आहार परिणामार्थं स्मरामि च वृकोदरम् ॥

## सन्ध्या दीप दर्शन श्लोकः

दीपज्योतिः पर-म्ब्रह्म दीपज्योतिर्जनार्दनः ।
दीपो हरतु मे पाप-न्दीपज्योतिर्नमो-ऽस्तुते ॥

शुभ-ङ्करोति कल्याणं आरोग्य-न्धनसम्पदः ।
शत्रु-बुद्धि-विनाशाय दीपज्योतिर्नमो-ऽस्तुते ॥

## निद्रा श्लोकः

रामं स्कन्धं हनुमन्तं-वैँनतेयं-वृँकोदरम् ।
शयने य-स्स्मरेन्नित्य-न्दुस्वप्न-स्तस्यनश्यति ॥

## अपराध क्षमापण स्तोत्रं

अपराध सहस्राणि, क्रियन्ते-ऽहर्निश-म्मया ।
दासो-ऽयमिति मा-म्मत्वा, क्षमस्व परमेश्वर ॥

करचरण कृतं-वाँ कर्म वाक्कायजं-वाँ
श्रवण नयनजं-वाँ मानसं-वाँपराधम् ।
विहित मविहितं-वाँ सर्वमेत-त्क्षमस्व
शिव शिव करुणाब्धे श्री महादेव शम्भो ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृते-स्स्वभावात् ।
करोमि यद्यत्सकल-म्परस्मै
नारायणायेति समर्पयामि ॥

## देवता स्तोत्राः

## कार्य प्रारम्भ स्तोत्राः

शुक्ला-म्बरधरं-विँष्णुं शशिवर्ण-ञ्चतुर्भुजम् ।
प्रसन्नवदन-न्ध्याये-थ्सर्व विघ्नोपशान्तये ॥

यस्यद्विरद वक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्न-न्निघ्नन्तु सततं-विँष्वक्सेन-न्तमाश्रये ॥

## गणेश स्तोत्रं

वक्रतुण्ड महाकाय सूर्यकोटि समप्रभः ।
निर्विघ्न-ङ्कुरु मे देव सर्व कार्येषु सर्वदा ॥

अगजानन पद्मार्क-ङ्गजानन महर्निशम् ।
अनेकदन्-त-म्भक्तानाम्-एकदन्त-मुपास्महे ॥

## विष्णु स्तोत्रं

शान्ताकार-म्भुजगशयन-म्पद्मनाभं सुरेशं
विश्वाधार-ङ्गगन सदृश-म्मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्त-ङ्कमलनयनं-योँगिहृद्ध्यानगम्यं
वन्दे विष्णु-म्भवभयहरं सर्वलोकैकनाथम् ॥

## गायत्रि मन्त्रं

ओ-म्भूर्भुव॒स्सुव॒ः । तथ्स॑वि॒तुर्वरे᳚ण्यं॒ ।
भर्गो॑ दे॒वस्य॑ धीमहि । धियो॒ यो नः॑ प्रचोदया᳚त् ॥

## शिव स्तोत्रं

त्र्य॑म्बकं-यँजामहे सुग॒न्धि-म्पु॑ष्टि॒वर्ध॑नम् ।
उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑ना-न्मृत्यो॑र्-मुक्षीय॒ मा-ऽमृता᳚त् ॥

वन्दे शम्भुमुमापतिं सुरगुरुं-वँन्दे जगत्कारणं
वन्दे पन्नगभूषणं शशिधरं-वँन्दे पशूना-म्पतिम् ।
वन्दे सूर्यशशाङ्क वह्निनयनं-वँन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रय-ञ्च वरदं-वँन्दे शिवं शङ्करम् ॥

## सुब्रह्मण्य स्तोत्रं

शक्तिहस्तं-विँरूपाक्षं शिखिवाहं षडाननं
दारुणं रिपुरोगघ्न-म्भावये कुक्कुट ध्वजम् ।

स्कन्दं षण्मुख-न्देवं शिवतेज-ञ्चतुर्भुजं
कुमारं स्वामिनाध-न्त-ङ्कार्तिकेय-न्नमाम्यहम् ॥

## गुरु श्लोकः

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरु-स्साक्षा-त्परब्रह्मा तस्मै श्री गुरवे नमः ॥

## हनुम स्तोत्राः

मनोजव-म्मारुत तुल्यवेग-ञ्जितेन्द्रिय-म्बुद्धिमतां-वँरिष्टम् ।
वातात्मजं-वाँनरयूध मुख्यं श्रीरामदूतं शिरसा नमामि ॥

बुद्धिर्बलं-यँशोधैर्य-न्निर्भयत्वमरोगता ।
अजाड्यं-वाँक्पटुत्व-ञ्च हनुमस्स्मरणा-द्भवेत् ॥

जयत्यति बलो रामो लक्ष्मणस्य महाबलः ।
राजा जयति सुग्रीवो राघवेणाभि पालितः ॥

दासो-ऽह-ङ्कोसलेन्द्रस्य रामस्याक्लिष्ट कर्मणः ।
हनुमान् शत्रुसैन्याना-न्निहन्ता मारुतात्मजः ॥

## श्रीराम स्तोत्रां

श्री राम राम रामेति रमे रामे मनोरमे
सहस्रनाम तत्तुल्यं राम नाम वरानने

श्री रामचन्द्र-श्श्रितपारिजात-स्समस्त कल्याण गुणाभिरामः ।
सीतामुखाम्भोरुहाचञ्चरीको निरन्तर-म्मङ्गलमातनोतु ॥

## श्रीकृष्ण स्तोत्रं

मन्दारमूले मदनाभिरामं
बिम्बाधरापूरित वेणुनादम् ।
गोगोप गोपीजन मध्यसंस्थं
गोप-म्भजे गोकुल पूर्णचन्द्रम् ॥

## गरुड स्वामि स्तोत्रं

कुङ्कुमाङ्कितवर्णाय कुन्देन्दु धवलाय च ।
विष्णु वाह नमस्तुभ्य-म्पक्षिराजाय ते नमः ॥

## दक्षिणामूर्ति स्तोत्रं

गुरवे सर्वलोकाना-म्भिषजे भवरोगिणाम् ।
निधये सर्व विद्यानां श्री दक्षिणामूर्तये नम ॥

## सरस्वती श्लोकः

सरस्वती नमस्तुभ्यं-वँरदे कामरूपिणी ।
विद्यारम्भ-ङ्करिष्यामि सिद्धिर्भवतु मे सदा ॥

या कुन्देन्दु तुषार हार धवला, या शुभ्र वस्त्रावृता ।
या वीणा वरदण्ड मण्डित करा, या श्वेत पद्मासना ।
या ब्रह्माच्युत शङ्कर प्रभृतिभिर्-देवै-स्सदा पूजिता ।
सा मा-म्पातु सरस्वती भगवती निश्शेषजाड्यापहा ॥

## लक्ष्मी श्लोकः

लक्ष्मी-ङ्क्षीरसमुद्र राज तनयां श्रीरङ्ग धामेश्वरीम् ।
दासीभूत समस्त देव वनितां-लोँकैक दीपाङ्कुराम् ।

श्रीमन्मन्ध कटाक्ष लब्ध विभव ब्रह्मेन्द्र गङ्गाधराम् ।
त्वा-न्त्रैलोक्यकुटुम्बिनीं सरसिजां-वँन्दे मुकुन्दप्रियाम् ॥

## दुर्गा देवी स्तोत्रं

सर्व स्वरूपे सर्वेशे सर्व शक्ति समन्विते ।
भयेभ्यस्ताहि नो देवि दुर्गादेवि नमोस्तुते ॥

## त्रिपुरसुन्दरी स्तोत्रं

ओङ्कार पञ्जर शुकीं उपनिषदुद्यान केलि कलकण्ठीम् ।
आगम विपिन मयूरीं आर्यां अन्तर्विभावयेद्गौरीम् ॥

## देवी श्लोकः

सर्व मङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यम्बके देवि नारायणि नमोस्तुते ॥

## वेङ्कटेश्वर श्लोकः

श्रियः कान्ताय कल्याणनिधये निधये-ऽर्थिनाम् ।
श्री वेङ्कट निवासाय श्रीनिवासाय मङ्गलम् ॥

## दक्षिणामूर्ति श्लोकः

गुरवे सर्वलोकाना-म्भिषजे भवरोगिणाम् ।
निधये सर्वविद्याना-न्दक्षिणामूर्तये नमः ॥

## बौद्ध प्रार्थन

बुद्धं शरण-ङ्गच्छामि
धर्मं शरण-ङ्गच्छामि
सङ्घं शरण-ङ्गच्छामि

## शान्ति मन्त्रं

असतोमा सद्गमया ।
तमसोमा ज्योतिर्गमया ।
मृत्योर्मा अमृतङ्गमया ।
ॐ शान्ति-श्शान्ति-श्शान्तिः

सर्वे भवन्तु सुखिन-स्सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःख भाग्भवेत् ॥
ॐ शान्ति-श्शान्ति-श्शान्तिः

ॐ सर्वेषां स्वस्तिर्भवतु,
सर्वेषां शान्तिर्भवतु ।
सर्वेषा-म्पूर्ण-म्भवतु,
सर्वेषा-म्मङ्गल-म्भवतु ।
ॐ शान्ति-श्शान्ति-श्शान्तिः

ॐ स॒ह ना॑ववतु । स॒ नौ॑ भुनक्तु । स॒ह वी॒र्य॑-ङ्करवावहै ।
ते॒ज॒स्विना॒वधी॑तमस्तु मा वि॑द्वि॒षा॒वहै᳚ ॥
ॐ शान्ति॒-श्शान्ति॒-श्शान्ति॑ः ॥

## स्वस्ति मन्त्राः

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्यायेन मार्गेण मही-म्महीशाः ।
गोब्राह्मणेभ्य-श्शुभमस्तु नित्यं
लोका-स्समस्ता-स्सुखिनो भवन्तु ॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोय-ङ्क्षोभरहितो ब्राह्मणास्सन्तु निर्भयाः ॥